# कौटलीयम् अर्थशास्त्रम्

## विनयाधिकारिकम्

## प्रथमाधिकरणम्

# विद्याः

- आन्वीक्षिकी त्रयी वार्ता दण्डनीतिश्चेति विद्याः
- त्रयी वार्ता दण्डनीतिश्चेति मानवाः। त्रयीविशेषौ ह्यान्वीक्षिकीति।
- वार्ता दण्डनीतिश्चेति बार्हस्पत्याः।
- दण्डनीतिरेका विद्येत्यौशनासाः।
- चतस्र एव विद्या इति कौटिल्यः।

# त्रयी

- साम ऋग्यजुर्वेदास्त्रयः त्रयी।
- अथर्ववेदेतिहास वेदौ च वेदाः। शिक्षा कल्पो व्याकरणं निरुक्तं छन्दविचितिः ज्योतिषामिति चाङ्गानि।
- एष त्रयीधर्मः चतुर्णां वर्णानामाश्रमानां च स्वधर्मस्थापनादौपकारिकः।

# आन्वीक्षिकी

- सांखं योगो लोकायत्तं चेत्यान्वीक्षिकी।
- प्रदीपः सर्वाविद्यानामुपायः सर्वकर्मणाम्। आश्रयः सर्वधर्माणां शश्वदान्वीक्षीकी मता ।।

# वार्ता

- कृषिपाशुपाल्ये वार्तावणिज्या च वार्ता।
- धान्यपशुहिरण्यकुप्यविष्टि प्रदानादौपकारिकी। तया स्वपक्षं परपक्षं च वशीकरोति कोशदण्डाभ्याम्।

# दण्डः

- आन्वीक्षिकी त्रयी वार्तानां योगक्षेमसाधनो दण्डः। तस्य नीतिः दण्डनीतिः।
- अलब्धलाभार्था लब्धपरिरक्षणी, रक्षितविवर्धिनी, वृद्धस्य तीर्थेषु प्रतिपादिनी च। तस्यमायता लोकयात्रा।

# मात्सन्याय

- अप्रणीतोऽहि दण्डः मात्सन्यायमुद्भावयति। वलीयान् अवलं हि ग्रसते दण्डधराभावे।
- यदि न प्रणयेद्राजा दण्डं दण्डष्वतन्द्रितः। शूले मत्स्यान् इवापक्ष्यन् दुर्वलान् वलवत्तराः।।
- चतुर्वर्णाश्रमो लोको राञ्जा दण्डेन पालितः। स्वधर्मकर्माभिरतो वर्तते स्वेषु वेश्मसु।।